শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

সেৱা শ্রী শ্রীনিৱাসরাঘৱার্য মহাদেশিক ৱিরচিতম্

# ॥শ্রীলক্ষ্মীহযৱদন মঙ্গলম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰীলক্ষ্মীহযৱদন মঙ্গলম্ ॥

মণিমণ্ডপিকাস্থানীমণ্ডনায মহীযসে।
মঙ্গলাভরণাযাস্তু তুরগাস্যায মঙ্গলম্॥ ১ ॥

ইন্দিরালিঙ্গনানন্দনিধযে নিধযে সতাম্।
সুন্দরায সুপূর্ণায ৱাজিৱক্ত্রায মঙ্গলম্॥ ২ ॥

ৱিরিঞ্চিমুখদেৱাদিৱেদৱ্যাখ্যানকারিণে।
ৱ্যাখ্যাঙ্কিতকরাযাস্তু ৱাগধীশায মঙ্গলম্॥ ৩ ॥

ৱাচি ৱেদশ্রিযং স্বান্তে কৃপাশ্রিযং অপাঙ্গযোঃ।
অনুগ্রহশ্রিযং ধর্ত্রে হযশীর্ষায মঙ্গলম্॥ ৪ ॥

প্রপন্নাভযদাযাস্তু দিৱ্যদৃষ্টিপ্রদাযিনে।
দেশিকারাধ্যদৈৱায হযগ্রীৱায মঙ্গলম্॥ ৫ ॥

জ্ঞানানন্দসুখারোগ্য ভুক্তিমুক্ত্যাদিদাযিনে।
স্বাশ্রিতায শরণ্যায ৱাগ্ৱরেণ্যায মঙ্গলম্॥ ৬ ॥

গোদাশঠারি ভগৱদ্রামানুজমুখৈসসদা।
দেশিকেন চ যুক্তায নিত্যং ভৱতু মঙ্গলম্॥ ৭ ॥

আত্রেযশ্রী শ্রীনিৱাসরাঘৱেণানু সংহিতম্।
শ্রেযো দদাতু পঠতাং শ্রীহযানন মঙ্গলম্॥ ৮ ॥

॥ ইতি শ্ৰীলক্ষ্মীহযৱদন মঙ্গলং সংপূর্ণম ॥

www.prapatti.com